## (157) "कण शब्दार्थः" (I-भ्वादिः-449. सक. सेट्. पर.)

'कणेः कणति शब्दार्थे, काणयेण्णौ निमीलने ॥' (श्लो-90) इति देवः ।

काणकः-णिका, काणकः-णिका, चिकणिषकः-षिका, [1]चङ्कणकः-णिका ;
कणिता-त्री, काणयिता-त्री, चिकणिषिता-त्री, चङ्कणिता-त्री ;
कणन्-न्ती, काणयन्-न्ती, चिकणिषन्-न्ती ; —
कणिष्यन्-न्ती-ती, काणयिष्यन्-न्ती-ती, चिकणिषिष्यन्-न्ती-ती ; —
— काणयमानः, काणयिष्यमाणः, [2]चङ्कण्यमानः, चङ्कणिष्यमाणः ;
[3]काण्-काणौ-काणः ; — — —
कणितम्-तः, काणितः-तम्, चिकणिषितः, चङ्कणितः-तवान् ;
कणः, [A]उत्कणः, [4]कङ्कणः, काणः, चिकणिषुः, चिकाणयिषुः, चङ्कणः ;
कणितव्यम्, काणयितव्यम्, चिकणिषितव्यम्, चङ्कणितव्यम् ;
कणनीयम्, काणनीयम्, चिकणिषणीयम्, चङ्कणनीयम् ;
काण्यम्, काण्यम्, चिकणिष्यम्, चङ्कण्यम् ;
ईषत्कणः-दुष्कणः-सुकणः ; — —
कण्यमानः, काण्यमानः, चिकणिष्यमाणः, चङ्कण्यमानः ;
काणः, [5]कणः, काणः, चिकणिषः, चङ्कणः ;
कणितुम्, काणयितुम्, चिकणिषितुम्, चङ्कणितुम् ;
[6]कणितिः, काणना, चिकणिषा, चिकाणयिषा, चङ्कणा ;
कणनम्, काणनम्, चिकणिषणम्, चङ्कणनम् ;

---

1. यङि अभ्यासस्य 'नुगतोऽनुनासिकान्तस्य' (7-4-85) इति नुक् ।
2. शानचः शित्त्वात् 'कर्तरि शप्' (3-1-68) इति शप् । तस्य 'अतो गुणे' (6-1-97) इति पररूपम् । 'आने मुक्' (7-2-82) इति मुक् ।
3. 'अनुनासिकस्य क्विझलोः क्ङिति' (6-4-15) इति दीर्घः ।
4. 'कं शुभं कणति इति कङ्कणम् = करभूषणम् । पचाद्यच् (3-1-134) ।' इत्यमरसुधा ।
5. 'गोचरसंचर–' (3-3-119) इति सूत्रे चकारस्यानुक्तसमुच्चयार्थकत्वात् अस्यापि धातोः घप्रत्ययः संज्ञायां भवति । कणः = लेशः सूक्ष्मतण्डुलश्च ।' इति मा. धा. वृत्तौ ।
6. 'तितुत्रेष्वग्रहादीनाम्—' (वा. 7-2-9) इति पर्युदासादिड् भवति । यथा भणितिरित्यत्र ।

A. 'अणद्दिशः केलिरणैर्मनोज्ञया वाण्या भणन्तो मणिभूषणोत्कणाः ।
बनात्कुमाराः कणिताग्र्यवेणवो व्रणद्विषाणभ्रणिताभ्रमाययुः ॥' धा. का. 1-58.